# अधिवेशनेषु प्राच्यविद्याधिवेशनम्
# [ Adhiveshaneshu Prachyvidyadhiveshanam]


**विवेक कुमार जोशी [ Vivek Kumar Joshi ]**

**बागेश्वर उत्तराखण्ड**

**[Bageshwar Uttrakhand]**

**शोधच्छात्र श्रीवेंकटेश्वरविश्वविद्यालय गजरौला उत्तरप्रदेश**

**[Shri Venkateshwara University Gajraula Uttarpradesh]**

**अनुक्रमांक SUV17010029**

**विषय – संस्कृत**

**Vivekanandbaalvyasho3@gmail.com**

**phon. +918126602756**

**Prof. Ritu Bhardwaj**

**Shri Venkateshwara University Gajraula Uttarpradesh**



**शोधसारः**

साम्प्रतं सम्मेलनं शिक्षायाः क्षेत्रे उच्चशिक्षणस्य कृते एका महत्त्वपूर्णा पद्धतिः विधीयते। यया शिक्षायाः संज्ञानात्मकाः भावनात्मकाः च उच्चतराः उद्देश्याः सिद्धाः भवन्ति। एष एकस्य विशालस्य समूहस्य समागमो अस्ति, यस्य अन्तर्गतं तत्कालीनगम्भीरसमस्यानां चर्चा भवति। आधुनिककाले सम्मेलानां महत्त्वं प्रत्येकस्मिन् क्षेत्रे प्रचलति। सामाजिकविज्ञानविषयाणां प्रचारार्थं भारते सम्मेलनानां प्रायोजकत्वं विविधसंस्थानानाम् एका मुख्यतमा योजना वर्तते। एतादृशः संस्थानो वर्तते, महाराष्ट्रप्रान्तस्य पुण्यनगरस्थ **अखिलभारतीयप्राच्यविद्याधिवेशनशोधसंस्थानम्,** यत् लोकेऽस्मिन् भाण्डारकरप्राच्यविद्याशोधसंस्थानेतिनाम्ना अपि सुप्रथितम्। अस्मिन्नेव संस्थाने प्रथमवारमखिलभारतीयप्राच्यविद्यासम्मेलनस्य समायोजनमभवत्। अनेन संस्थानेन अद्यावधिपर्यंतं प्रायः शतवर्षेषु भारते विविधस्थानेषु पंचाशताधिवेशनानाम् आयोजनं कृतः। **'अधिवेशनेषु प्राच्यविद्याधिवेशनम्'** इति शीर्षकत्वेन सम्मेलनानां ऐतिहासिकविवरणं महत्त्वं च गवेषकेनात्र प्रस्तुतं कृतोस्ति।


**प्रस्तावना**

सामाजिकविज्ञानविषयाणां प्रचारार्थं भारते सम्मेलनानां प्रायोजकत्वं विविधसंस्थानानाम् एका मुख्यतमा योजना वर्तते। एतेषु शोधकर्तृभ्यः शिक्षाविदां च विचाराणां मतानाम् आदानप्रदानस्य, नीतिसम्बद्धविषयेषु, शोधप्रश्नानां, सम्बोधनस्य, वादप्रतिवादस्य च महत्त्वपूर्णसामाजिकसमस्यानां विषये शैक्षणिकसंशोधनपरिणामानाम् अवसराश्च प्राप्यन्ते यद्यपि परिषद् स्वयं केचन संगोष्ठ्यः समायोजयति तथापि तस्याः अधिकांशं समर्थनं सर्वकारेण भवति, सर्वकारेण सर्वेषु सामाजिकविज्ञानविषयेषु

राष्ट्रिय–अन्ताराष्ट्रीय–संगोष्ठीनाम् आयोजनार्थं शैक्षणिकसंस्थाभ्यः आंशिकवित्तीयसहायतापि प्रदीयते।

सामाजिकविज्ञानस्य व्यापकविषयक्षेत्रेषु निम्नलिखितविषयास्सन्ति

१.समाजशास्त्रं सामाजिकनृविज्ञानं च।

२.राजनीतिविज्ञानं लोकप्रशासनं च।

३.अर्थशास्त्रम्।

४. अन्ताराष्ट्रीयाध्ययनम्।

५.सामाजिकं भूगोलम्।

६.वाणिज्यं प्रबन्धनं च।

७.सामाजिकमनोविज्ञानम्।

८.शिक्षा।

९.सामाजिकभाषाविज्ञानं–सांस्कृतिकाध्ययनं च।

१०.विधि/अन्ताराष्ट्रीयविधि।

११.राष्ट्रियसुरक्षा सामाजिकाध्ययनं च।

१२. अन्ये सम्बद्धाः सामाजिकविज्ञानविषयाः (पुस्तकालयविज्ञानं,सामाजिककार्यं, संचारमाध्यमाध्ययनम्, आधुनिकसामाजिकेतिहासः, चिकित्साध्ययनं, लैंगिकाध्ययनं, पर्यावरणाध्ययनम्, ऊर्जाध्ययनं, प्रवासीयाध्ययनं ,क्षेत्रीयाध्ययनं संस्कृतसमाजः संस्कृतिश्च ) अन्तर्विषयक–बहुविषयकानुसंधानस्याध्ययनम्।

सम्मेलनस्य प्रस्तावाः निम्नलिखितेषु त्रिषु वर्गेषु संपादिताः भवन्ति–

**१.राष्ट्रियसम्मेलनम्–**

अस्य सम्मेलनस्य प्रस्तावः व्यापकः अन्तार्विषयः राष्ट्रियस्तरस्य सहभागिताम् आमन्त्रयत्सु महत्त्वपूर्णसामाजिकविज्ञानविषयेषु स्पष्टतयावधारणायुक्तश्च भवेत्। एतादृशेषु सम्मेलनेषु भारतीयविद्वत्सु सहभागिता समावेशिता च भवेत्। राष्ट्रियसम्मेलने महत्त्वपूर्णनीतिनिमित्तैस्सह वर्तमानराष्ट्रियान्ताराष्ट्रीय–महत्त्वस्य प्राधान्यं प्रदीयते।

**२. अन्ताराष्ट्रियसम्मेलनम्–**

अन्ताराष्ट्रीयसम्मेलने अन्ताराष्ट्रीयदृष्टिकोणेनसह शोधप्राथमिकतानां विषयाणां च विषये अन्ताराष्ट्रीयसम्मेलनस्यावश्यकतानुसारम् आवेदनप्रस्तावः सुनियोजितः सुन्यायश्च संभवेत्। एतेनामंत्रितविदुषः पत्रयोगदातृरूपेण अधिकाधिकसङ्ख्यायां पाश्चात्यविदुषां वा दृढोपस्थितिः सुनिश्चिता भवेत्।

**३.सहकारिणीसंगोष्ठी–**

अनुसंधानपरिषद् सामाजिकविज्ञानसंसोधनप्रधानतां विद्यमानानां सर्वकारीयविभागैः वा प्रतिष्ठितैः शोधसंस्थाभिस्सह नीति–उन्मुख/सामाजिकरूपेण प्रासंगिकविषयेषु संयुक्तगोष्ठीनां प्रस्तावानां विषये अपि विचारं करोति अथवा सक्रियरूपेण सहकार्यं याचते।

प्राच्यविद्याशोधसंस्थानस्य इदमधिवेशनं राष्ट्रीयाधिवेशनं वर्तते यत् भारतीयसर्वकाराद् पंजीकृतमपि विधीयते, अस्यायोजनं वर्षद्वयान्तराले अखिलभारतीयप्राच्यविद्याधिवेशनशोधसंस्थानस्य माध्यमेन विविधस्थलेषु विभिन्नसंभागेषु च भवति। एषा संस्था संविधानस्य (संस्था–अधिनियम XXI1860 एकः सार्वजनिकन्यासः)

इत्यस्यान्तर्गतं पंजीकृता सार्वजनिकसंस्थास्ति। एषा संस्था महाराष्ट्रसर्वकारस्य वार्षिकं सुनिश्चितानुदानमपि प्राप्नोति। एतस्यां संस्थायां विशिष्टसंशोधनपरियोजनानां कृते भारतसर्वकारेण विश्वविद्यालयानुदानायोगेन चानुदानं प्राप्यते।[1]

**परिचय**

प्राच्यविद्या– प्राच्यः–प्राचीप्रदेशे जातः इत्यर्थः। प्राच्यां भवः – प्राच्यः। प्राङ्–प्रा×च–प्राच्– **'द्यु प्रागप्रागु दक्प्रतीचोयत्'**[2] इति पाणिनीयसूत्रेण यत् प्रत्यये प्राच्यः शब्दः निष्पन्नो भवति।

अमरकोशेउक्तं – **''देशः(प्राग्दक्षिणः)प्राच्य उदीच्यः (पश्चिमोत्तरः)।'' १.७**

**'' दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्ययादयः।'' १.२३**

अतः अत्रस्पष्टमस्ति यत् ''पूर्वदक्षिणदेशीये प्राच्यः'। तस्यविद्यां प्राच्यविद्या भवतीति।

विद्–ज्ञाने–तत्त्व–साक्षात्कारे[3] च । पाणिनीयानुसारेण क्यप् प्रत्ययो भूत्वा विद्याशब्दः निष्पन्नः भवति। श्रुतौ तु विद्याभेदः द्विविधः परापरभेदादुक्तः। ययाक्षरमधिगम्यते सा परा इति। अपरा च अध्ययनाध्यापनरूपा।

प्राच्यपदं साम्प्रतं सामान्यतया एशियायाः कृते प्रयुक्तम् भवति।

**जम्बूद्वीपापराख्यस्यैशियाखण्डस्य वाङ्मयम्।**

**मन्तव्यं यत्र विद्वद्भिः प्राच्यविद्यां नमामि ताम्।।**[4]

भूमध्यसागरस्य पूर्वदिशि स्थिताः (पूर्वि देशाः) प्राच्यदेशाः इति समुच्यन्ते। पाश्चात्यदृष्ट्या प्राच्यदेशाः पूर्वाधुनिकाः, पारम्परिकाः, रहस्यपूर्णाः च आसन्। अत एव पाश्चात्यविद्वान्सः एतेषां देशानां साहित्यस्य संस्कृतेश्च विशदानुसंधानं कृतवन्तः।

अत्र प्राच्यपदः आंग्लशब्दः 'ओरिएन्टेल'(oriental)[5]इत्यस्य शब्दस्य संस्कृतरूपान्तरितमेव अस्ति। अयं शब्दः आंग्लभाषायाः(orient)[6]इत्यनेन शब्देन निर्मितं भवति, यः आंग्लभाषायां पूर्वदिशायाः द्योतकः। यस्मिन् पाश्चात्यसाम्राज्यवादिनः निजोपनिवेशरूपेण स्वाधिपत्यं स्थापितवन्तः। आंग्लभाषायाः 'occident'[7] इतिशब्दस्यविलोमरूपेण अयं 'orient' शब्दः विकसितः अभूत्। यस्य तात्पर्यः प्रगतिशीलेन पाश्चात्यजगता अस्ति। अस्य शब्दस्य अवधारणात्मकरूपेण पाश्चात्यः(occident) स्वस्य विपरीतध्रुवरूपेण प्राच्यस्य(orient) रचनालोकं स्वेच्छया भ्रमात्मकं दुराग्रहपूर्णं च इति प्रस्तुतं करोति स्म। ऐतिहासिकभूमौ विचारधारारूपेण प्राच्यवादस्य अंतर्गतं पश्चिमेण स्वस्य श्रेष्ठतां साधयितुं प्राच्यसंस्कृतीनां स्थिरसंरचनायाः निर्माणंकृतम्। तत् कालखण्डे 'प्राच्यपाश्चात्यविवादः' नाम्ना एषा घटना प्रसिद्धास्ति।

प्राच्यविद्या पुरातत्त्वस्य सा शाखास्ति, यया तुर्की, ईरान, भारत, वर्मा, चीन, स्याम, मलयादयश्च प्राच्यदेशानां प्राच्यविद्भि ऐतिहासिकं, धार्मिकं, सांस्कृतिकं, पुरातात्त्विकं च मूल्यानाम् उपादेयतायाः समाजस्य समक्षेप्रस्तुतीकरणं भवति।

इयमेवसभा अधिवेशनमथवा सम्मेलनं च कथ्यते। विशेषरूपेण कस्याश्चिदपि प्रशासनिकसभायाः अथवा समितेः सम्मेलनम्, **अधिवेशनमित्यभिधीयते** परं तु सामान्यरूपेण 'सभा' इत्यस्य शब्दस्य पर्यायः एव अधिवेशनमथवा सम्मेलनम् अस्ति।

**अमरकोशे** – **समज्या परिषद्गोष्ठी–सभा–समिति–संसद।**

**आस्थानी क्लीवमास्थान स्त्रीनपुंसकयोः सदः।।**[8]

**वाचस्पत्ये** – 'सभा' सह भान्ति, अभीष्ट निश्चयार्थमेकत्र यत्रगृहे।[9]

आयार्णवनामके काव्ये सम्मेलनस्य विषये डॉ0 शिवदत्तशर्मामहोदयः कथयति–

**'सम्मेलनमद्यत्वे संचितसंचालकं तत्त्वम्।**

**सम्मेलने समन्तात्साम्मुख्यं सत्यमुन्मिषति।।**[10]

**एतिहासिकी पृष्ठभूमि**

अष्टादशशताब्द्याः उत्तरार्द्धे अस्मिन् भारते देशे ईस्टइण्डियाकम्पनी – स्वस्य पूर्णतया आधिपत्यं स्थापितकृतवती तस्मिन्नेवसमये **प्राच्यविद्या**(Oriental Studies) नामकः नूतनोऽयं विषयः विकसितोऽभूत्।[11] यस्य–उद्देश्यं विशेषरूपेण प्राच्यदेशानां साहित्यस्येतिहासस्य,पुरातात्विकमूल्यानां च तथ्यात्मकमध्ययनमासीत्।

तस्मिन् समये सुप्रसिद्धचार्ल्सविल्किस(Charles-Wilkins-१७४६–१८३६)–महोदयेन काश्यां श्रीमद्भगवद्गीतायाः अध्ययनं कृत्वा गीतायाः आंग्लानुवादश्च कृतः। यः १७८५ ईसवीयतमे वर्षे प्रकाशितोऽभवत् पश्चात् द्वयवर्षानन्तरं हितोपदेशस्यापि अनुवादं प्रकाशनं चाकुर्वत्।[12]

तस्मिन्नेव कालावधौ महोदयः सर–विलियमजोन्स् (William-Jones-१७४६–१७९४) भारतदेशे आगतः तेन भारतदेशे कलिकातायां 'फोर्टविलियम'(Fort-William) इत्यत्र बंगाल–एशियाटिक–सोसाइटी–(Asiatic-Society of Bengal) नामकसंस्थायाः १५.०१.१७८४तमे खैष्टदिनांके स्थापना कृता। प्राचीनपाण्डुलिपीनां संरक्षणं तथा च प्राच्याध्ययनस्य प्रवर्धनमेवं संस्थायाः हेतुः। १७८९ तमेवर्षे विलियममहाशयेनकालिदासविरचितं सुप्रसिद्ध–अभिज्ञानशाकुन्तलं नाटकस्य तथा च मनुस्मृत्याः आङ्गलानुवादः कृतः।[13] विलियममहोदयः प्रथमः पाश्चात्यविदुषः येन संस्कृतग्रन्थस्य प्रथमवारं यूरोपीयभाषायां सम्पादनं प्रकाशनं च कृत्वा अद्वितीयः गौरवः प्राप्तः।

१७९२ ईसवीतमे 'ऋतुसंहार'नामकखण्डकाव्यस्य प्रकाशनमभवत्। तदनन्तरं इग्लैण्डदेशीयप्राच्यविद्याविशारदः हेनरीथॉमसकोलब्रुकमहोदयेन(Henry-Thomas-Colebrook-१७६५–१८३७) संस्कृतभाषा एवं साहित्यं वैज्ञानिकविधानुसारं स्वहस्तगतं कृत्वा संस्कृतविद्यायाः प्रत्येकस्मिन् शाखायाः सम्बद्धम् अनेकानेकग्रन्थानाम् आनुवादितं संस्करणं प्रकाशितं कृत्वा स्वनिबन्धानां च प्रस्तुतीकरणं कृतवान्।[14]

खीष्टाब्दस्य १८०५तमे सर–हेनरी–थॉमस–कोलब्रुक्महोदयेन संस्कृतसाहित्यस्य प्राचीनमहत्त्वम् उद्घाटयितुं स्वस्य 'The Vedas' इतिनाम्ना निबन्धे उद्धृतकृतमासीद्।[15] कोलब्रुक्महोदयेनैव १८२३ ईसवीतमे मार्चमासस्य १५ दिनांके ग्रेटब्रिटेन–आयरलैण्ड–इत्ययोः रॉयल–एशियाटिक–सोसाइटी (Royal Asiatic Society of Great Britain And Ireland) इतिनाम्नी संस्थायाः स्थापना कृता। अस्य राजसंधिः किंग्–जार्ज–चतुर्थ (King-George iv) महोदयात् १८२४ईसवीतमे अगस्तमासस्य११दिनांके संप्राप्ता। अस्यास्थापना एशियायाः कलाविज्ञानसाहित्यं च तत्सम्बद्धविषयाणां परीक्षणायाथ च प्रोत्साहनाय अभवत्। एषा संस्था एशियायाः भाषासु,संस्कृतिषु, इतिहासेषु च रूचिं विद्यमानानां जनानां कृते बौद्धिकविचाराणाम् आदान–प्रदानार्थं निरन्तरं मंचरूपेण कार्यं करोति।

तदनन्तरं जर्मनविदुषा एफ्0–रोजेन–(Friedrich-August-Rosen-१८०५–१८३७ )महोदयेन यूरोपवासीजनेभ्यः संस्कृतसाहित्यस्य परिचयं कारयितुं भारतीयपाण्डुलिपीनामनुसंधानं कृत्वा ऋग्वेदस्य सम्पादनं कृतम्, महोदयस्यासामयिककालवलयानन्तरं मैक्समूलर–(Max-Muller-१८२३–१९०० ) महोदयैः १८३८ ईसवीतमे वर्षे अस्य ग्रन्थस्य प्रकाशनं कृतम्।[16]

तदनन्तरं वैदिकभाषाशास्त्रस्यसंस्थापकः रूडाल्फ–रॉथ–(Rudolf-Von-Roth-१८२१–१८९५)महोदयेन १८४६तमेखीष्टाब्दे ''वैदिकसाहित्येतिहासः(On The Literature and History of The Veda)'' इतिनाम्ना शोधप्रबन्धग्रन्थः साहित्यजगति प्रस्तुतः।[17] तदारभ्यैव पाश्चात्यसंस्कृतस्याध्यवसाया वैदिकसाहित्यस्य दिशायां चिरस्थायीप्रेरणां प्राप्तवन्तः। तस्मिन् कालावधौ यूरोप, अमेरिकादिदेशेषु वैदिकसाहित्याध्ययनस्योपक्रमः आरब्धः। येनोत्तरकालिककृतयः एतावदुत्साहं प्राप्तवन्तः यत् प्रायः पंचाशतवर्षेषु महत्त्वपूर्णग्रन्थानां तथ्यात्मकं संस्करणं विद्वद्भिः सम्पादितम्।

पाश्चात्यानामनुसंधानेन अखिलविश्वेस्मिन् भारतदेशस्य नूतना कीर्तिः स्थापिताभवत्। यया यूरोप–अमेरिका एवं च उत्तरेशियायाः साहित्यप्रेमिणः दार्शनिकाश्च अत्यन्ताः विस्मिता अभूवन्। फलस्वरूपतया भारतेऽपि नवजागरणस्य विपुलवेगे प्राच्यविद्यायाः कार्यस्योप्युत्थानमभवत्।

प्राच्यविद्यायामन्वेषणार्थम् आंग्लप्राच्यविद्वद्भिः ''इण्टरनेशनल कांग्रेस ऑफ ओरिएंटलिस्ट'' इतिनाम्नासंस्थायाः गठनं कृतम्। अस्य निर्माणस्य विचारः फ्रान्सदेशीयप्राच्यविदा 'Proff-leon-de-Rosny'(१८३७–१९१४)– महाभागेन कल्पितः आसीत्।[18] अस्या अन्ताराष्ट्रीया संस्थायाः सम्मेलनानामायोजने'रॉयल–एशियाटिक–सोसाइटी'–इत्यस्यापियोगदानं महनीयं विद्यते, यस्याः स्थापना सर्–विलियम–जोन्स– इत्यनेन कृतासीत्। अस्याः संस्थायाः माध्यमेनैव अन्ताराष्ट्रीयाधिवेशनानां सकलविवरणं सम्पादितं प्रकाशितं च भवति स्म।

'इण्टरनेशनल कांग्रेस ऑफ ओरिएंटलिस्ट' इति संस्थायाः माध्यमेन अन्ताराष्ट्रीयप्राच्याध्ययनस्य १८७३ ईसवीतमे प्रथमं सम्मेलनं पेरिसनाम्नः स्थाने अभवत्।[19] यः अन्ताराष्ट्रीयप्राच्यविद्यासम्मेलनस्य संज्ञां प्राप्तवान्। अस्योद्देश्यः पाश्चात्यदेशानां मध्ये प्राच्यजनानाम् इतिहासः, भाषाणां, संस्कृतीनां, साहित्यिकज्ञानस्य चोपस्थापनम् इत्यासीद्। अनेन प्राच्यविद्यायाः अकादमिकमूल्यानां प्रतिनिधित्वं कृतम्। श्रीमतः पण्डितशंकरपाण्डुरंगमहाभागः प्रथमो भारतीयः येनात्र भारतस्य प्रतिनिधित्वं कृतम्। तत्र भारतीयसाहित्यस्यानुसंधानेन पण्डितशंकरपाण्डुरंगमहाभागेन नूतना कीर्तिः समवाप्ता, यथा प्रभाविताः भूत्वा भारतस्य नैकेः विद्वान्सः तत्र प्रतिभागम् अकुर्वन्यशश्च प्राप्तवन्तः एतेषा प्राच्यविज्ञानाम् एते मुख्यतमाः सन्ति डॉ.रामकृष्णगोपालभाण्डारकरः डॉ. जीवनजी–जमशेदजीमोदी(J.J.Modi-१८५४–१९३३) डॉ. हरिलालहर्षदरायध्रुवश्चादयः (H.H.Druva-१८५६–१८९६)।[20]

प्राच्यानुसंधानस्य समन्वयं कुर्वन्त्याः अन्ताराष्ट्रीयप्राच्यविदां 'काङ्ग्रेस'–इत्यस्यानुरूपं भारते सम्मेलनस्यायोजनस्य विचारं प्रवर्त्तयितुं भाण्डाकरप्राच्यशोधसंस्थायाः एवमहनीययोगदानमस्ति।

भारतस्य सुप्रसिद्धप्राच्यविद्याविशारदेषु अन्यतमः सर्वश्रीरामकृष्णगोपाल–भाण्डारकरवर्यः यः१८७० ईसवीतमे प्राचीनपाण्डुलिपीनां, ताम्रपत्राणां, शिलालेखानां चाध्ययनेन साहित्यिकानाम् एवं च धार्मिकग्रन्थानां विश्वसनीयतर्काणां प्रकटीकृत्य पाश्चात्यविदूषानपि प्रभावितं कृतम्।

१८७४ईसवीतमे लंदने आयोजितायामन्ताराष्ट्रियप्राच्यविद्यासम्मेलनपक्षात् भाण्डारकरमहोदयाय आमन्त्रणमगच्छत्, गन्तुमसमर्थः सः नागपुराभिलेखानां शिलालेखानां चाध्ययनं कृत्वा तत्सम्बद्धमेकं शोधपत्रं लिखितवान्, येन सः महतीं प्रशंसां कीर्तिं च प्राप्तवान्।[21]

१८७६ ईसवीतमे बम्बई (इदानीं मुम्बई) सर्वकारेण प्राचीनसंस्कृति–लेखानामनुसंधानस्याध्यक्षं भाण्डारकरमहोदयमचूचुनत्। स्वस्य परिश्रमात् महोदयः अनुसंधानकार्यं पूर्णमपिकृतम्।

१९११ईसवीतमे सर–हरकोर्ट–बटलर(Harcourt-Butler-१८६६–१९३८)महोदयेन शिमलानगरे अन्ताराष्ट्रियानां प्राच्यविदां सभाम् आहूय 'अन्ताराष्ट्रियप्राच्यविद्या–कांग्रेस'(I.C.O)इत्यस्य आदर्शेन भारतवर्षे अपि प्राच्यविद्यासम्मेलनस्य आयोजनस्य प्रस्तावस्य चर्चां कृतवान् यस्मिन् पुरालेखविज्ञः प्रो.जे. पीएच.वोगेल(J.Ph.Vogel-१८७१–१९५७)महाभागेन प्रस्तावं अयच्छत् ।[22] अस्मिन् प्रस्तावे एतौ मुख्यविषयौ आसीत्

क. भारते केन्द्रीयः अखिलभारतीयप्राच्यविद्याशोधसंस्थानस्य स्थापना।

ख. भारतस्य विभिन्नस्थलेषु प्राच्यविद्याधिवेशनानामावश्यकता उपयोगिता च

ततः ०६जुलाई१९१५तमे वर्षे पुणेनगरेस्थितः अनाद–आश्रमे प्राच्यविज्ञानाम् एका संगोष्ठ्यां भाण्डारकरमहोदयस्य सम्माने 'प्राच्यविद्याशोधसंस्थानस्य' स्थापनायाः निर्णयं कृतः ।[23]

ततः श्रीभाण्डारकरमहोदयस्यानेक शिष्याणां, प्रशंसकानां, मित्रबान्धवानां च हार्दिकीच्छया अस्य कृतयः चिरस्मरणीयार्थं ०६जुलाई१९१७ईसवीतमे एकाशीतिः जन्मोत्सवस्यावसरे महाराष्ट्रस्य पुणेनगरे ''सर्वश्री–रामकृष्णगोपालभाण्डारकर–प्राच्यविद्याशोधपरिषद्'' (B.O.R.I.)इत्याख्यस्य संस्थायाः स्थापनाभूत्। तदुपरान्त भाण्डारकरमहोदयेन स्वस्य अनुपमं पुस्तकालयं संस्थानेस्मिन् प्रदत्तः। ततः पूर्वे खिस्ताब्दस्य १९१५तमेवर्षे अस्या संस्थायाः योजनां तत्कालिकमहाराष्ट्रसर्वकारेण स्वीकृता आसीत् तत्कालीनराज्यपालः लॉर्ड–विलिंगडन(Lord-Willingdon-१८६६–१९४१)–महाभागेन एतस्या संस्थायाः औपचारिकोद्घाटनं कृतम् आसीत् , सररतन–सरदोराबटाटा–इतिमहाभागद्वयोः आर्थिकसहाय्येन एकः विशिष्टसभागारः सुनिर्मितौ यस्योद्घाटनम् औंधसंस्थानस्यप्रतिनिधिः श्रीमतःबालासाहेबपंत(१८६१–१९५१)महाभागेन जुलाईमासस्य षड्दिनांके १९१८तमेवर्षे कृतः ।[24] आरम्भे एतस्यपरिषदोऽध्यक्षः लॉर्ड–विलिंगडन–महाभागः (१८६६–१९४१) एव आसीत् । इंचलकरंजीइत्यस्य प्रमुखः श्रीमतःनारायणरावः गोविन्दरावः बाबासाहेब'घोरपडे'महाशयः(१८७६–१९४३)तथा च सर–दोराब–टाटामहाभागः(Sir-Dorab-Tata-१८५९–१९३६)अथ च करवीरमठस्य शंकराचार्यः श्रीविद्याशंकरभारती(१८७६–१९६७)अपि संस्थानस्योपाध्यक्षाः आसन् ।[25]

ततः ११अगस्त१९१८तमदिनांके परिषदा एका सामान्यगोष्ठ्यां परिषदः संविधानं स्वीकृतवान् अथ च प्रथमनियामकपरिषदो निर्वाचनम् अभूत्। ततो अस्मिन्नेव वर्षे सितम्बरमासस्य अष्टदिनांके प्रथननियामकपरिषदः प्रथमगोष्ठ्यां प्रथमकार्यकारिणीसभायाः निर्वाचनमभवत् ततः दिनद्वयोः पर्यन्तं कार्यकारिणीसभायाः प्रथमगोष्ठ्यां प्रथममानितसदस्यत्वेन श्रीमतः पी.डी. गुणेमहाभागमचूचुनत् ।[26]

तदनन्तरं १२दिसम्बर १९१८तमेखैष्टदिनांके प्राच्यविद्वद्भिः समायोजितायाम् एका सभायां पुण्यनगरे नवस्थापिते भाण्डारकरप्राच्यशोधपरिषदि सम्मेलनस्यायोजनार्थं दृढसंकल्पः कृतवन्तः, अतः एतस्य कृते मार्चमासस्य दिनांकत्रये १९१९तमेवर्षे प्राच्यविद्याविशारदानां कार्यसमित्याः गठनमभूत्। नियामकपरिषदि मुख्यतया त्रिन्शतसदस्याः भवन्ति, पंचविंशतिसदस्याः वर्षत्रयेषु सामान्यनिकायेन निर्वाचितं भवन्ति तथा च पंचसदस्याः महाराष्ट्रसर्वकारेणचयनिताः भवन्ति। कार्यकारिणीसभायां नवसंख्याका सदस्याः भवन्ति द्वौ सदस्यौ सर्वकारेण निर्वाचितौ तेषु एतस्याकार्यकारिणीसभायाः मुख्यसदस्यत्वेन एते प्राच्यविदाः निर्वाचिताः –

इतिहासविद् श्रीविश्वनाथकाशीनाथ राजवाडे (१८६३–१९२६), श्रीके.जी. जोशी, डॉ.वी.एस.घाटे, डॉ. श्रीपादकृष्णबेल्वल्करः, डॉ.रामचन्द्रदत्तात्रेयःरानाडे (१८८६–१९५७), डॉ. नरहरगोपालःसरदेसाई(१८७३–१९४३), प्रो. रघुनाथदामोदरः कर्मकरः, डॉ.नारायणबाबू

उत्गीकरः, डॉ. पाण्डुरंगः दामोदरगुणे।[27] अन्येषु सदस्येषु डॉ.विष्णुसीतारामःसुकथांकरः, प्रो. आनन्दशंकरबापूभाईध्रुवः (१८६९–१९४२), प्रो. देवदत्तः रामकृष्णभाण्डारकरः,प्रो. मैसूरहिरियान्ना, डॉ.गंगानाथझा,डॉ.हरप्रसादशास्त्री,श्रीदामोदरवामनपोद्दारादयश्च विज्ञाः निर्वाचिताः रॉयल–एशियाटिक–सोसाइटी–इत्यस्य बम्बईशाखायाः एकः प्रतिनिधिसदस्योपि निर्वाचितः। एतस्यपरिषदः महासचित्वेन श्रीमतः श्रीपादकृष्णवेल्वलकरमहाभागं निर्वाचितं परन्तु तस्यास्वीकृत्या कार्यकारिणीसभया ०६मार्च१९१९तमे ख्रैष्टदिनांके श्रीमतःपी.डी.गुणे, प्रो. आर.डी.कर्मकरः, डॉ.नारायण बी. उट्गीकरश्चेतेषान् महाभागान् संयुक्तसचिवत्वेन निर्वाचिताः।[28]

सर्वे सचिवाः समितेः अनुमोदनेन १९१९तमवर्षस्य मार्चमासस्य २२दिनांके सम्पूर्णभारतस्य प्रायः पंचाशतानां पण्डितानां कृते अस्य सम्मेलनस्य प्रथममौपचारिकपत्रं प्रेषितवन्तः,सम्मेलनस्य सुसिद्धयर्थे प्रारम्भे समितिः प्रायः नवलघुगोष्ठीषु आयोजितवती,तत्फलस्वरूपेण भारतीयप्राच्यविद्यासम्मेलनस्य प्रथममधिवेशनं १९१९ईसवीतमस्य वर्षस्य ०५दिनांकात् ०७नवंबरपर्यन्तं भाण्डारकरशोधसंस्थानस्य परिसरे सुसम्पन्नः अभवत्।[29] अस्मिन्नेव वर्षे संस्थानस्य शोधपत्रः 'एनल्स ऑफ द भाण्डारकर ओरिएंटल रिसर्च इंस्टीट्यूट' इत्यस्य प्रकाशनारम्भो अभवत्। ३१दिसम्बर१९४३तमे ख्रैष्टदिनांके एषा संस्था सर्वकारेण अस्याधिवेशनस्य 'केन्द्रीयः कार्यालयः' इतिरूपेण पंजीकृता।[30] ततः संस्थानस्य मानितसदस्यः डॉ.दाण्डेकरमहाभागः सम्मेलनस्य महासचिवत्वेन निर्वाचितः । ख्रीस्ताब्दस्य १९१९तमवर्षादरभ्य २०२०तमवर्षपर्यन्तम् शतवर्षेषु पंचाशताधिवेशनाः भारते विविधस्थानेषु आयोजिताः अभवन्।

**सम्मेलनस्योद्देश्याः**

अखिलभारतीय प्राच्यविद्यासम्मेलनं (A.I.O.C.)भारतीयप्राच्यविद्वानानां संगोष्ठी अस्ति, यस्याः मुख्यम् उद्देश्यं प्राच्यशिक्षणस्य विभिन्नशाखासु, विशेषतः पुरातत्त्वाध्ययनस्य विषये, पारम्परिक–आधुनिकयोः साहित्ये, शोधकार्येषुच समन्वयं प्रतिष्ठापनम् अस्ति

तस्मिन् कालखण्डेभारतेऽपि गणितशास्त्रम्, विज्ञानम्, इतिहासः, अर्थशास्त्रम्, अभियान्त्रिकीशास्त्रम् इत्यादिषु अन्येषु शिक्षणशाखासु एतादृशानां शोधसम्मेलनानां महदावश्यकता आसीत्। प्राच्यविषयाणां कृते सम्मेलनस्य योजना चिरकालात् प्रचलति स्म साम्प्रतं सा योजना फलीभूता। यदि सम्मेलनमिदं सफलं भवति तर्हि प्राच्यविद्वद्भिः भारतस्य विभिन्नेषु शिक्षाकेन्द्रेषु समये–समये अस्यायोजनं कर्तुं शक्यते इति तेषां मनोऽभिलाषासीत्।

सम्मेलनस्यायोजनस्यारम्भे विविधानिः उद्देश्यानि लक्ष्याणि च आसन् येषु एते मुख्यतमाः सन्ति–

क. भारतस्य सर्वेषां प्रान्तानां प्राच्यविद्वद्भिः एकत्रीकर्तुं, तेषां प्राच्यविद्याविषयकानुसंधानस्य क्रियाकलापानां विवेचनार्थम्।[31]

ख. प्राच्यविद्याध्ययने अनुसंधाने च सहकार्यस्य सुविधां विशदीकर्तुम्।

ग. प्राच्यविद्वान्सः स्वविषयसम्बद्धविचाराणां विनिमयार्थं,तेषाम् अध्ययने सम्मुखीभूतानि कष्टानि अतितर्तुम् एतस्य कृते अवसरप्रदातुम्।

घ.प्राच्यविद्वत्सु सामाजिकं बौद्धिकं च समन्वयं प्रवर्धयितुम्।

ङ.अमेरिका–यूरोपदेशे च विद्वत्तायाः प्रगतियात्रायाः सह समन्वयनं संस्थापयितुम्।[32]

च. पाश्चात्यदेशानां मध्ये प्राच्यजनानाम् इतिहासः, भाषाणां, संस्कृतीनां, साहित्यिकज्ञानं चोपस्थापयितुम्।

**निष्कर्षः**

सकलाधिवेशनेषु प्राच्यविद्याधिवेशनम् संसारे विशिष्टतमं स्थानं प्राप्नोति। अस्मिन्नधिवेशने विविधसंभागानां विशिष्टव्याख्यानं, शास्त्रार्थसभा, शोधपत्रवाचनं, नाट्यप्रस्तुतिः, विद्वद्भिः अभिनन्दनं, ग्रन्थप्रदर्शनी, ग्रन्थप्रकाशनं, कविसम्मेलनं, पुरस्कारसमर्पणं चादीनि शैक्षिककार्यक्रमाणामायोजनानि भवन्ति। यानि जनमानसं नवनवोन्मेषदिशां दातुं लाभप्रदाः।

इदं सम्मेलनं न केवलं संस्कृतेन सह सम्बद्धः अपितु अनेकाभिः प्राच्यभाषाभिस्सह अपि सम्बद्धम्। प्राच्यविद्यायां अनेकैः भाषाः विद्याश्च सम्मिलिताः भवन्ति ।

भारतदेशस्य पाश्चात्यदेशस्य च प्रतिष्ठितविद्वान्साः यथा– श्रीरामकृष्णगोपालभाण्डारकरः,जीवनजीजमशेदजीमोदी, श्रीरमेशचन्द्रमजूमदारः, श्रीरामनारायणदाण्डेकरः, आचार्यसिलवॉलेवी, डॉ0गंगानाथझा, फ्रैडरिक–विलियम–थौमस, पं.महामनामदनमोहनमालवीयः, श्रीकृष्णबेल्वल्करः, डॉ0राजेन्द्रप्रसादः, श्रीपाण्डुरंगवामनकाणे, डॉ0सर्वपल्लीराधाकृष्णन, श्रीनेमिनाथउपाध्यायः, आचार्यश्रीराधाबल्लभत्रिपाठी, श्रीमतःगौतमपटेलश्च – इत्यादयः सुप्रतिष्ठितजनाः संस्थायाः पदानलंकृतं कृत्वा समाजे अस्योपादेयतासिद्धीकृतवन्तः। अस्य फलस्वरूपेणाद्य न केवलं भारतीयाः अपि च विदेशामनेकानेक विश्वविद्यालयेषु प्राच्यविद्यायाः पठन्–पाठनादि कार्यं सतत् रूपेण निर्गच्छनस्ति। अनेकानि संस्थानानि स्थापितानि सन्ति भारतवर्षे, ये शोधविद्यार्थिनां कृते नवनवोन्मेषमार्गाननावृत्तं कुर्वन्तः सन्ति। अत एव प्राच्यविद्या सकलजनानां कृते महत्त्वपूर्णास्ति। अधुना अधिवेशनानामायोजनं महत्तमं वर्तते किन्तु तेष्वपि प्राच्यविद्याधिवेशनाः विशिष्टतमाः सन्ति।

भारतीयसमाजे प्राच्यविद्याविषयकस्य पर्याप्तज्ञानस्याभावस्य, दर्शन–अध्यात्मविमुखतायाश्च कारणेन आस्था प्रश्नचिह्नानां तथा च संशयानां रूपेण परिणितमभवन्नस्ति। देशस्य प्रसिद्धशोधसंस्थानेन अखिलभारतीयप्राच्यविद्याशोधसंस्थानेन येन पूर्वं शतवर्षेषु स्वस्याधिवेशनानां माध्यमेन पुरातात्त्विकी, ऐतिहासिकी,सारस्वती अथ च शैक्षिकज्ञानराशिः समाजाय प्रदत्ता, या सैद्धान्तिकधरातले प्राच्यविद्यासंरक्षणस्य तथा च संवर्धनस्य महनीयकार्यहेतुना समाजे उल्लेखनीया वर्तते।

पादटिप्पणयः

| |
|---|
| 1. भाण्डारकरप्राच्यशोधसंस्थानस्य आधिकारिक–अन्तर्जालीयपुटे bori.ac.in |
| 2. ४.२.१०१ पाणिनीयाष्टाध्यायी |
| 3. १०६५ धातुपाठः |
| 4. प्राच्यविद्याशताब्दीयं श्लोकसंख्या४३६ |
| 5. The Students English-Sanskrit Dictionary. पृष्ठसंख्या २६७ |
| 6. The Students English-Sanskrit Dictionary. पृष्ठसंख्या २६७ |
| 7. The Students English-Sanskrit Dictionary. Vaman Shivram Apte Mrs. Radhabai Atmaram Sagoon, Kalkadevi Road Bombay १८६३ ई. पृष्ठसंख्या २६१ |

| |
|---|
| 8. अमरकोशे श्लोकसंख्या २.७.१५ श्रीमदमरसिंहप्रणीतः श्रीमन्नालाल 'अभिमन्यु' इत्यनेन विरचितया धराख्य हिन्दीटीकया संवलितः काशीस्थ संस्कृतबुकडिपो इत्यस्याधिपैः मास्टरखेलाडीलाल एण्ड सन्स इत्येतै १६३८तमे खैष्टे प्रकाशितः पृष्ठसंख्या १६१। |
| 9. वाचस्पत्यम् षष्ठो भागः श्रीतारानाथवाचस्पतिभट्टाचार्येण संकलितम् २००६ राष्ट्रीयसंस्कृतसंस्थानदिल्ली तः प्रकाशितं चौखम्बा संस्कृतसीरीजवाराणसी–१ तः पुनर्मुद्रितं संस्करणम् पृष्ठसंख्या ५२२७ । |
| 10. आर्यार्णवः आचार्यशिवदत्तशर्मा 'चतुर्वेदी'इत्यनेन प्रणीतः, अर्वाचीनसंस्कृतं संयुक्तांके १४१–१५८ पृष्टसंख्या. २५७ श्लोकसंख्या.२४६८–६६ |
| 11. अंतर्जालपुटे .https://www.jansatta.com/sunday-column/the-sanskrit-language-theme-has-been-a-pioneer-of-indian-literature-consciousness-and-is-recognized-all-over-the-world/1362343/ |
| 12. संस्कृतसाहित्य का अभिनव इतिहास भूमिकायां आचार्यराधाबल्लभत्रिपाठी द्वितीयसंस्करण २००७ई. विश्वविद्यालयप्रकाशनवाराणसी पृष्ठसंख्या १२ |
| 13. भारतीयसाहित्य का इतिहास आलोचनात्मक अध्ययन लेखकद्वय– आचार्य देवीशंकर मिश्र डॉ.राजकिशोरसिंह प्रकाशनकेन्द्रलखनऊ पृष्ठसंख्या ६ |
| 14.एंथनी मैक्डोनल–प्रणीत संस्कृतसाहित्य का इतिहास अनुवादक– चारूचन्द्रशास्त्री चौखम्बा विद्याभवनवाराणसी१ तृतीयसंस्करण१६५०ईसवीतमे |
| 15.एंथनी मैक्डोनल–प्रणीत संस्कृतसाहित्य का इतिहास पृष्ठसंख्या ४ अनुवादक– चारूचन्द्रशास्त्री चौखम्बा विद्याभवनवाराणसी१ तृतीयसंस्करण१६५०ईसवीतमे पृष्ठसंख्या३ |
| 16. तत्रैव |
| 17. Proceedings of The Twenty-Sixth Internationl Congress of Orientlists. १६६६तमे खैष्टे प्रकाशितः, प्रकाशकः – ए.के.घोष आयोजकसमितिसचिवः मुद्रकः – S.N. Guha Ray. Shree Saraswaty, Press Limited,32 Acharya,Prafullchandra Road , Calcutta 9 पृष्ठ संख्या १ |
| 18. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 Poona 1919पृ.सं.२ |
| 19. तत्रैव |
| 20. मराठीविश्वकोशे भाण्डारकर, रामकृष्णगोपालः vishwakosh.marathi.gov.in |
| 21. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 Poona 1919पृ.सं.७ |
| 22. भाण्डारकरप्राच्यशोधसंस्थानस्य आधिकारिक–अन्तर्जालीयपुटे bori.ac.in |

| |
|---|
| 23. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 1919पृ.सं.४६ |
| 24. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 Poona 1919पृ.सं.४६ |
| 25. भाण्डारकरप्राच्यशोधसंस्थानस्य आधिकारिक–अन्तर्जालीयपुटे bori.ac.in |
| 26. मराठीविश्वकोशे भाण्डारकर, रामकृष्णगोपालः vishwakosh.marathi.gov.in |
| 27. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 Preface-पृ.सं.२ |
| 28.तत्रैव |
| 29. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 1919 Preface-पृ.सं. ७–८ |
| 30. भाण्डारकरप्राच्यशोधसंस्थानस्य आधिकारिक–अन्तर्जालीयपुटे bori.ac.in |
| 31. Proceedings and transactions Of The First Orientel Conference,Poona vol-1 1919 Preface-पृ.सं.४ |
| 32.तत्रैव |

**संदर्भ ग्रन्थाः**

1.Proceedings and transactions Of The First Orientel Conference,Poona vol-1 Bhandarkar oriental Research Institute Poona 1920

2.Proceedings of The Twenty-Sixth Internationl Congress of Orientlists. १६६६तमे खैष्टे प्रकाशितः, प्रकाशकः – ए.के.घोष आयोजकसमितिसचिवः, मुद्रकः – S.N. Guha Ray. Shree Saraswaty, Press Limited,32 Acharya,Prafullchandra Road , Calcutta 9 १६६६तमे खैष्टे प्रकाशितः

3.भारतीयसाहित्य का इतिहास आलोचनात्मक अध्ययन लेखकद्वय– आचार्य देवीशंकर मिश्र डॉ.राजकिशोरसिंह प्रकाशनकेन्द्रलखनऊ

4.एंथनी मैक्डोनल–प्रणीत संस्कृतसाहित्य का इतिहास पृष्ठसंख्या ४ अनुवादक– चारूचन्द्रशास्त्री चौखम्बा विद्याभवनवाराणसी१ तृतीयसंस्करण१६५०ईसवीतमे

5.आर्यार्णवः आचार्यशिवदत्तशर्मा 'चतुर्वेदी'इत्यनेन प्रणीतः, अर्वाचीनसंस्कृतं संयुक्तांके १४१–१५८ , देववाणीपरिषद्दिल्ली **२०१४–२०१८**

6.संस्कृतसाहित्य का अभिनव इतिहास भूमिकायां आचार्यराधाबल्लभत्रिपाठी द्वितीयसंस्करण २००७ई. विश्वविद्यालयप्रकाशनवाराणसी

7. डॉ.रमाकान्तशुक्लप्रणीत प्राच्यविद्याशताब्दीयम् देववाणीपरिषद् दिल्ली 2020 Isbn 978-81-85924-39-7

**कोश एवं व्याकरणग्रन्थाः**

1.डॉ.नरेश झा महर्षिपाणिनीविरचिता अष्टाध्यायी–'शान्ति' संस्कृतहिन्दी व्याख्याविभूषितः 2014 ISBN 9789380326403

2.डॉ.नरेशझा महामुनिपाणिनीप्रणीत धातु–पाठः चौखम्बासुरभारतीप्रकाशन 2015

वाचस्पत्यम् षष्ठो भागः श्रीतारानाथवाचस्पतिभट्टाचार्येण संकलितम् २००६ राष्ट्रीयसंस्कृतसंस्थानदिल्ली तः प्रकाशितं चौखम्बा संस्कृतसीरीजवाराणसी–१ तः पुनर्मुद्रितं संस्करणम्

3.अमरकोश श्रीमदमरसिंहप्रणीतः श्रीमन्नालाल 'अभिमन्यु' इत्यनेन विरचितया धराख्य हिन्दीटीकया संवलितः काशीस्थ संस्कृतबुकडिपो इत्यस्याधिपैः मास्टरखेलाडीलाल एण्ड सन्स इत्येतै १६३८तमे खैष्टे प्रकाशितः

4.The Students English-Sanskrit Dictionary. Vaman Shivram Apte Mrs. Radhabai Atmaram Sagoon, Kalkadevi Road Bombay १८६३ ई.

**पत्रिका**

अर्वाचीनसंस्कृतम् त्रैमासिक पत्रिका देववाणीपरिषद् दिल्ली प्रधानसंपादकः–डॉ.रमाकान्तशुक्ल संयुक्तांकः १४१–१५८ **२०१४–२०१८ ISSN 2230-9551**

**अंतर्जालीय स्रोत**

1.भाण्डारकरप्राच्यशोधसंस्थानस्य आधिकारिक–अन्तर्जालीयपुटे bori.ac.in

2.मराठीविश्वकोशे भाण्डारकर, रामकृष्णगोपालः vishwakosh.marathi.gov.in

3.अंतर्जालपुटे .https://www.jansatta.com/sunday-column/the-sanskrit-language-theme-has-been-a-pioneer-of-indian-literature-consciousness-and-is-recognized-all-over-the-world/1362343/